# Ganga Ashtakam

# શ્રીગઙ્ગાષ્ટકમ્

## Document Information

Text title : Ganga Ashtaka

File name : gangaashta.itx

Category : aShTaka, devii, nadI, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Dhrup Chand

Proofread by : Dhrup Chand, Rajani Arjun Shankar

Latest update : 1998, February 21, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 21, 2025

*sanskritdocuments.org*

# શ્રીગઙ્ગાષ્ટકમ્

ૐ
ભગવતિ તવ તીરે નીરમાત્રાશનોઽહં
વિગતવિષયતૃષ્ણઃ કૃષ્ણમારાધયામિ ।
સકલકલુષભઙ્ગે સ્વર્ગસોપાનગઙ્ગે
તરલતરતરઙ્ગે દેવિ ગઙ્ગે પ્રસીદ ॥ ૧॥

ભગવતિ ભવલીલામૌલિમાલે તવામ્ભઃ
કણમણુપરિમાણં પ્રાણિનો યે સ્પૃશન્તિ ।
અમરનગરનારીચામરમરગ્રાહિણીનાં
વિગતકલિકલઙ્કાતઙ્કમઙ્કે લુઠન્તિ ॥ ૨॥

બ્રહ્માણ્ડં ખણ્ડયન્તી હરશિરસિ જટાવલ્લિમુલ્લાસયન્તી
સ્વર્લોકાત્ આપતન્તી કનકગિરિગુહાગણ્ડશૈલાત્ સ્ખલન્તી ।
ક્ષોણી પૃષ્ઠે લુઠન્તી દુરિતચયચમૂર્નિર્ભરં ભર્ત્સયન્તી
પાથોધિં પૂરયન્તી સુરનગરસરિત્ પાવની નઃ પુનાતુ ॥ ૩॥

મજ્જન્માતઙ્ગકુમ્ભચ્યુતમદમદિરામોદમત્તાલિજાલં
સ્નાનૈઃ સિદ્ધાઙ્ગનાનાં કુચયુગવિગલત્ કુઙ્કુમાસઙ્ગપિઙ્ગમ્ ।
સાયમ્પ્રાતર્મુનીનાં કુશકુસુમચયૈઃ છન્નતીરસ્થનીરં
પાયાન્નો ગાઙ્ગમમ્ભઃ કરિકલભકરાક્રાન્તરંહસ્તરઙ્ગમ્ ॥ ૪॥

આદાવાદિ પિતામહસ્ય નિયમવ્યાપારપાત્રે જલં
પશ્ચાત્ પન્નગશાયિનો ભગવતઃ પાદોદકં પાવનમ્ ।
ભૂયઃ શમ્ભુજટાવિભૂષણમણિઃ જહ્નોર્મહર્ષેરિયં
કન્યા કલ્મષનાશિની ભગવતી ભાગીરથી દૃશ્યતે ॥ ૫॥

શૈલેન્દ્રાત્ અવતારિણી નિજજલે મજ્જત્ જનોત્તારિણી
પારાવારવિહારિણી ભવભયશ્રેણી સમુત્સારિણી ।
શેષાહેરનુકારિણી હરશિરોવલ્લીદલાકારિણી

કાશીપ્રાન્તવિહારિણી વિજયતે ગઙ્ગા મનોહારિણી ॥ ૬॥

કુતો વીચિર્વીચિસ્તવ યદિ ગતા લોચનપથં
ત્વમાપીતા પીતામ્બરપુરનિવાસં વિતરસિ ।
ત્વદુત્સઙ્ગે ગઙ્ગે પતતિ યદિ કાયસ્તનુભૃતાં
તદા માતઃ શાતક્રતવપદલાભોઽપ્યતિલઘુઃ ॥ ૭॥

ગઙ્ગે ત્રૈલોક્યસારે સકલસુરવધૂધૌતવિસ્તીર્ણતોયે
પૂર્ણબ્રહ્મસ્વરૂપે હરિચરણરજોહારિણિ સ્વર્ગમાર્ગે ।
પ્રાયશ્ચિત્તં યદિ સ્યાત્ તવ જલકણિકા બ્રહ્મહત્યાદિપાપે
કસ્ત્વાં સ્તોતું સમર્થઃ ત્રિજગદઘહરે દેવિ ગઙ્ગે પ્રસીદ ॥ ૮॥

માતર્જાહ્નવી શમ્ભુસઙ્ગમિલિતે મૌલૌ નિધાયાઞ્જલિં
ત્વત્તીરે વપુષોઽવસાનસમયે નારાયણાઙ્ઘ્રિદ્વયમ્ ।
સાનન્દં સ્મરતો ભવિષ્યતિ મમ પ્રાણપ્રયાણોત્સવે
ભૂયાત્ ભક્તિરવિચ્યુતા હરિહરાદ્વૈતાત્મિકા શાશ્વતી ॥ ૯॥

ગઙ્ગાષ્ટકમિદં પુણ્યં યઃ પઠેત્ પ્રયતો નરઃ ।
સર્વપાપવિનિર્મુક્તો વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧૦॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય શ્રીગોવિન્દભગવત્પૂજ્યપાદસ્યશિષ્યા
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ ગઙ્ગાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ।

It is attributed to agastimuni. See 398 of Ganga GYAna mahodadhi

Encoded by Dhrup Chand

Proofread by Dhrup Chand, Rajani Rajun Shankar

*Ganga Ashtakam*

pdf was typeset on February 21, 2025

Please send corrections to *sanskrit@cheerful.com*